# महाशान्तिधारा

**ॐ नमः सिद्धेभ्यः।**

ॐ णमो अरिहंताणं, णमो सिद्धाणं,
णमो आइरियाणं, णमो उवज्झायाणं,
णमो लोए सव्व साहूणं।

चत्तारि मंगलं अरिहंत मंगलं सिद्धा मंगलं साहू मंगलं केवली पण्णत्तो धम्मो मंगलं।

चत्तारि लोगुत्तमा अरहंता लोगुत्तमा सिद्धा लोगुत्तमा साहू लोगुत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमो।

चत्तारि सरणं पव्वज्जामि अरहंते सरणं पव्वज्जामि सिद्धे सरणं पव्वज्जामि साहू सरणं पव्वज्जामि केवलिपण्णत्तं धम्मं सरणं पव्वज्जामि।

ॐ ह्रीं अनादिसिद्ध-महामन्त्रपूजनभक्तिप्रसादात्सर्वशान्तिर्भवतु स्वाहा।

ॐ ह्रीं श्रीं क्लीं अर्हं अ सि आ उ सा अनाहतविद्यायै णमो अरिहंताणं ह्रौं सर्वशान्तिर्भवतु स्वाहा।

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वं मं हं सं तं पं वं वं मं मं हं हं सं सं तं तं पं पं झं झं झ्वीं झ्वीं क्ष्वीं क्ष्वीं द्रां द्रां द्रीं द्रीं द्रावय-द्रावय नमोऽर्हते भगवते स्वाहा।

ॐ ह्रीं श्री सिद्धचक्राधिपतयेऽष्टगुणसमृद्धाय फट् स्वाहा।

**(छन्द = शार्दूलविक्रीडित छन्द)**

**श्रीखण्डोद्भवकर्दमैः सुरुचिरैः कर्पूरचूर्णैर्मितैः,**
**सम्मिश्रैरतिगन्धिभिः नदनदि-कासारकूपादिभिः।**
**पाथोभिः परिपूरितेन कलशैः नान्तस्थितैर्नात्मनां,**
**शान्त्यर्थं महाशान्तिमन्त्रपठनैर्देवं जिनं स्नापये।।**

**गद्य**

ॐ कर्पूरकाश्मीरागुरुमलयजादिक्षोदव्यामिश्रैर्निर्णिक्तस्वर्णरेणुयमान-कञ्जकिञ्जल्कपुञ्जपिञ्जरितैर्विजितविलसद्विलासिनीविलोललोचन-नीलनीरजजलपरिपूरितैः परिपूरितसकलजगद्-घ्राणविवरबन्धुरसौगन्ध्यैः।

**(वसन्ततिलका छन्द)**

**अन्धीकृतालिभिरभिष्टुतहेमकुम्भ–**
**सन्धारितैर्विजितदिक्द्वीपदानगन्धैः।**
**बन्धुप्रभुं भवभृतां हतघातिबन्धं–**
**गन्धोदकैर्जिनपतिं स्नपयामि शान्त्यै।।**

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वं मं हं सं तं पं वं वं मं मं हं हं सं सं पं पं झं झं झ्वीं झ्वीं क्ष्वीं क्ष्वीं द्रां द्रां द्रीं द्रीं द्रावय-द्रावय नमोऽर्हते भगवते श्रीमते ॐ ह्रीं क्रों **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** –––नामधेयस्य पापं खण्ड-खण्ड हन-हन दह-दह पच-पच पाचय-पाचय कुट-कुट शीघ्रं-शीघ्रं अर्हं झं झ्वीं क्ष्वीं हं सं झं वं ह्वः पः हः क्षां क्षीं क्षूं क्षें क्षैं क्षों क्षौं क्षं क्षः क्षीं ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रों ह्रौं हः ह्रीं द्रां द्रीं द्रावय द्रावय नमोऽर्हते भगवते श्रीमते ठ ठ ठ ठ (**(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मति-सागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** –––नामधेयस्य

**(प्रत्येक शब्द के बाद तथास्तु बोलना चाहिए।)**

श्रीरस्तु, सिद्धिरस्तु, वृद्धिरस्तु, तुष्टिरस्तु, पुष्टिरस्तु, शान्तिरस्तु, कान्तिरस्तु, कल्याणमस्तु स्वाहा। मनः समाधिरस्तु। दीर्घायुरस्तु।

ॐ ह्रीं अर्हं श्रीं नमोऽर्हतेऽनन्तचतुष्टयप्रभवाय मोक्षलक्ष्मीवशङ्कराय नमः स्वाहा।

ॐ ह्रीं अर्हन्मुखकमलनिवासिनि! पापात्मक्षयङ्करि! श्रुतज्ञानज्वालासहस्र-प्रज्वलिते सरस्वति! तव भक्तिप्रसादान्मम पापविनाशनं भवतु क्षां क्षीं क्षूं क्षौं क्षः क्षीरवरधवलेऽमृतसम्भवे वं वं हूं हूं स्वाहा।

सरस्वतिभक्तिप्रसादात्सुज्ञानं भवतु।

ॐ णमो भयवदो वड्ढमाणस्स रिसहस्स चक्कं जलंतं गच्छइ आयासं पायालं भूयलोयाणं भूयालं जए वा विवादे वा थंभणे वा रणंगणे वा रायंगणे वा थंभणे वा मोहणे वा सव्वजीवसत्ताणं अपराजिदो भवदु मे रक्ख-रक्ख स्वाहा।

अनेन वर्द्धमानमन्त्रेण सर्वरक्षा भवतु।

ॐ क्षां क्षीं क्षूं क्षें क्षैं क्षों क्षौं क्षं क्षः नमोऽर्हते सर्व रक्ष-रक्ष हूं फट् स्वाहा। सर्वरक्षा भवतु।

ॐ उसहाइजिण पणमामि। सया अमलो विमलो विरजो वरया कप्पतरु सव्वकामदुहा मम रक्ख सहापुरु विज्जणिही। ॐ अट्ठेवय अट्ठसया अट्ठसहस्सायं अट्ठलक्ख अट्ठकोडिओ रक्खं तुम्मं सरीरं देवासुर पणमिया सिद्धा।

ॐ ह्रीं श्रीं अर्हं नमः स्वाहा स्वधा। ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा नमः एतन्मन्त्रप्रसादात्सर्वभूतव्यन्तरादिबाधाविनाशनं भवतु।

ॐ ह्रीं श्रीं क्लीं महालक्ष्म्यै नमः।

ॐ नमोऽर्हते सर्वं रक्ष हूं फट् स्वाहा।

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः सर्वदिशागतविघ्नविनाशनं भवतु।

ॐ क्षां क्षीं क्षूं क्षौं क्षः सर्वविदिशागतविघ्नविनाशनं भवतु।

ॐ निखिलभुवनभवनमङ्गलभूत-जिनपतिस्नपनसमयसम्प्राप्तावसरमभि-नवकर्पूरकालागुरु-कुंकुमहरिचन्दनाद्यनेकसुगन्धिबन्धुरगन्धद्रव्यसम्भार-सम्बन्धबन्धुरमखिलदिगन्तरालव्याप्तसौरभातिशयसमाकृष्टसमदसामज-कपोलतलविगलितमदमुदितमधुकरनिकरमर्हत्परमेश्वरपवित्रतरगात्रस्पर्शन-मात्रपवित्रीभूतं भगवदिदं गन्धोदकधारावर्षममेषहर्षनिबन्धनं भवतु **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** ---नामधेयस्य

**(प्रत्येक शब्द के साथ तथास्तु बोलना चाहिए।)**

शान्तिं करोतु। कान्तिमाविष्करोतु। कल्याणं प्रादुष्करोतु। सौभाग्यं सन्तनोतु। आरोग्यमातनोतु। सम्पदः सम्पादयतु। विपदमवसादयतु। यशो विकासयतु। मनः प्रसादयतु। आयुर्द्राघयतु। श्रियं श्लाघयतु। शुद्धिं विशुद्धयतु। बुद्धिं विवर्धयतु। श्रेयः पुष्णातु। प्रत्यवायं मुष्णातु। अनभिमतं निवारयतु। मनोरथं परिपूरयतु।

परमोत्सवकारणमिदं, परम मङ्गलमिदं, परम पावनमिदं स्वस्त्यस्तु नः, स्वस्त्यस्तु वः इवीं क्ष्वीं हं सः अ सि आ उ सा सर्वशान्तिं पुष्टिं च कुरु-कुरु स्वाहा।

ॐ नमोऽर्हते भगवते श्रीमते त्रैलोक्यनाथाय, घातिकर्मविनाशनाय, अष्ट-महाप्रातिहार्यसहिताय, चतुस्त्रिंशदतिशयसमेताय, अनन्तदर्शनज्ञानवीर्यसुखा-त्मकाय, अष्टादशदोषरहिताय, पञ्चमहाकल्याणसम्पूर्णाय, नवकेवललब्धि-समन्विताय, दशविशेषणसंयुक्ताय, देवाधिदेवाय, धर्मचक्राधीश्वराय, धर्मोपदेशनकराय, चमरवैरोचनाच्युतेन्द्रप्रभृतीन्द्रशतेन मेरुगिरिशिखरशेखरी-भूतपाण्डुकशिलातलेन, गन्धोदकपरिपूरितानेकविचित्रमणिमयमङ्गलकलशै-रभिषिक्तमिदानीमर्हं त्रैलोक्येश्वरमर्हत्परमेष्ठिनमभिषेचयामि हैं झं इवीं क्ष्वीं हं सः द्रां द्रीं ऐं अर्हं ह्रीं क्लीं ब्लूं द्रां द्रीं द्रावय-द्रावय अ सि आ उ सा सर्वशान्तिं कुरु-कुरु स्वाहा।

**(क्रमशः आठ द्रव्यों से पूजन करनी चाहिए।)**

ॐ ह्रीं श्री वृषभादिवीरान्तेभ्योऽत्रावतरावतर संवौषट् इत्याह्वाननम्।
ॐ ह्रीं श्री वृषभादिवीरान्तेभ्योऽत्र तिष्ठ तिष्ठ ठः ठः स्थापनम्।
ॐ ह्रीं श्री वृषभादिवीरान्तेभ्योऽत्र मम सन्निहितो भव-भव वषट् सन्निधिकरणम्।

ॐ ह्रीं शीतोदकप्रदानेन शीतलो भगवान् प्रसीदतु शीता आपः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः जलं निर्वपामीति स्वाहा।

ॐ ह्रीं गन्धोदकप्रदानेन अभिनन्दनो भगवान् प्रसीदतु गन्धाः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः चन्दनं निर्वपामीति स्वाहा।

ॐ ह्रीं अक्षतोदकप्रदानेन अनन्तो भगवान् प्रसीदतु अक्षताः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः अक्षतान् निर्वपामीति स्वाहा।

ॐ ह्रीं पुष्पोदकप्रदानेन पुष्पदन्तो भगवान् प्रसीदतु पुष्पाणि पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः पुष्पं निर्वपामीति स्वाहा।

ॐ ह्रीं नैवेद्यप्रदानेन नेमिनाथो भगवान् प्रसीदतु पीयूषपिण्डाः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः नैवेद्यं निर्वपामीति स्वाहा।

ॐ ह्रीं दीपप्रदानेन चन्द्रप्रभो भगवान् प्रसीदतु कर्पूरमाणिक्य दीपाः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः दीपं निर्वपामीति स्वाहा।

ॐ ह्रीं धूपप्रदानेन धर्मनाथो भगवान् प्रसीदतु गुग्गुलादिदशाङ्गधूपाः पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः धूपं निर्वपामीति स्वाहा।

ॐ ह्रीं फलप्रदानेन पार्श्वनाथो भगवान् प्रसीदतु क्रमुकनारिङ्गप्रभृतिफलानि पान्तु शिवमाङ्गल्यन्तु श्रीमदस्तु वः फलं निर्वपामिति स्वाहा।

**(क्रमशः पाँच अर्घ्य चढ़ाने चाहिए।)**

ॐ अर्हन्तः पान्तु वः सद्धर्मश्रीबलायुरारोग्यैश्वर्याभिवृद्धिरस्तु वः अर्घ्यं निर्वपामीति स्वाहा।

ॐ सिद्धाः पान्तु वः हृदयं निर्वाणं प्रयच्छन्तु वः अर्घ्यं निर्वपामीति स्वाहा।

ॐ आचार्याः पान्तु वः शीतलसौगन्ध्यमस्तु वः अर्घ्यं निर्वपामीति स्वाहा।

ॐ उपाध्यायाः पान्तु वः सौमनस्यं चास्तु वः अर्घ्यं निर्वपामिति स्वाहा।

ॐ सर्वसाधवः पान्तु वः अन्नदानतपोवीर्यविज्ञानमस्तु वः अर्घ्यं निर्वपामिति स्वाहा।

**उदकचन्दनतन्दुलपुष्पकै-**
**श्चरुसुदीपसुधूपफलार्घ्यकैः।**
**धवलमङ्गलगानरवाकुले,**
**जिनगृहे जिननाथमहं यजे।**

ॐ ह्रीं श्री पञ्चपरमेष्ठिभ्योऽर्घ्यं निर्वपामीति स्वाहा।

ॐ सम्प्रतिकाल-श्रेयस्कर-स्वर्गावतरण-जन्माभिषेक-परिनिष्क्रमण-केवलज्ञान-निर्वाणकल्याणविभूषितमहाभ्युदयाः।

**(अब क्रम से तीर्थंकरों की जयकार करके पुष्प चढ़ाने चाहिए।)**

ॐ वृषभस्वामिनः श्रीपादपद्मप्रसादादष्टविधकर्मविनाशनमस्तु वः।

**(आदिनाथ भगवान की जय।)**

ॐ श्रीमदजितस्वामिनः श्रीपादपद्मप्रसादादजेयशक्तिर्भवतु वः।

**(अजितनाथ भगवान की जय।)**

ॐ श्री सम्भवस्वामिनः श्रीपादपद्मप्रसादादनेकगुणगणाश्चास्तु वः।

**(सम्भवनाथ भगवान की जय।)**

ॐ श्री अभिनन्दनस्वामिनः श्रीपादपद्मप्रसादादभिमतफलं पवित्रं प्रयच्छन्तु वः।

**(अभिनन्दननाथ भगवान की जय।)**

ॐ श्री सुमतिस्वामिनः श्रीपादपद्मप्रसादादमृतं पवित्रं प्रयच्छन्तु वः।

**(सुमतिनाथ भगवान की जय।)**

ॐ श्री पद्मप्रभस्वामिनः श्रीपादपद्मप्रसादाद् दयां प्रयच्छन्तु वः।

**(पद्मप्रभ भगवान की जय।)**

ॐ श्री सुपार्श्वस्वामिनः श्रीपादपद्मप्रसादात्कर्मक्षयाश्चास्तु वः।

**(सुपार्श्वनाथ भगवान की जय।)**

ॐ श्री चन्द्रप्रभस्वामिनः श्रीपादपद्मप्रसादाच्चन्द्रार्कतेजोऽस्तु वः।

**(चन्द्रप्रभ भगवान की जय।)**

ॐ श्री पुष्पदन्तस्वामिनः श्रीपादपद्मप्रसादात्पुष्पसायकातिशयोऽस्तु वः।

**(सुविधिनाथ भगवान की जय।)**

ॐ श्री शीतलस्वामिनः श्रीपादपद्मप्रसादादशुभकर्ममलप्रक्षालनमस्तु वः।

**(शीतलनाथ भगवान की जय।)**

ॐ श्री श्रेयांसजिनस्वामिनः श्रीपादपद्मप्रसादात् श्रेयस्करोऽस्तु वः।

**(श्रेयांसनाथ भगवान की जय।)**

ॐ श्री वासुपूज्यस्वामिनः श्रीपादपद्मप्रसादाद् रत्नत्रयवासं करोऽस्तु वः।

**(वासुपूज्य भगवान की जय।)**

ॐ श्री विमलस्वामिनः श्रीपादपद्मप्रसादात्सद्धर्मवृद्धिर्वै माङ्गल्यं चास्तु वः।

**(विमलनाथ भगवान की जय।)**

ॐ श्री अनन्तनाथस्वामिनः श्रीपादपद्मप्रसादाद् धनधान्याभिवृद्धिरक्षणमस्तु वः।

**(अनन्तनाथ भगवान की जय।)**

ॐ श्री धर्मनाथस्वामिनः श्रीपादपद्मप्रसादाच्छर्मप्रचयोऽस्तु वः।

**(धर्मनाथ भगवान की जय।)**

ॐ श्रीमदर्हत्परमेश्वर-सर्वज्ञपरमेष्ठी शान्तिनाथस्वामिनः श्रीपादपद्मप्रसादा-च्छान्तिं करोऽस्तु वः।

**(शान्तिनाथ भगवान की जय।)**

ॐ श्री कुन्थुनाथस्वामिनः श्रीपादपद्मप्रसादात्तन्त्राभिवृद्धिकरोऽस्तु वः।

**(कुन्थुनाथ भगवान की जय।)**

ॐ श्री अरजिनस्वामिनः श्रीपादपद्मप्रसादात्परमकल्याणपरम्परास्तु वः।

**(अरनाथ भगवान की जय।)**

ॐ श्री मल्लिनाथस्वामिनः श्रीपादपद्मप्रसादाच्छल्यविमोचनकरोऽस्तु वः।

**(मल्लिनाथ भगवान की जय।)**

ॐ श्री मुनिसुव्रतस्वामिनः श्रीपादपद्मप्रसादात्सम्यग्दर्शनं चास्तु वः।

**(मुनिसुव्रतनाथ भगवान की जय।)**

ॐ श्री नमिनाथस्वामिनः श्रीपादपद्मप्रसादात्सम्यग्ज्ञानं चास्तु वः।

**(नमिनाथ भगवान की जय।)**

ॐ श्री अरिष्टनेमिस्वामिनः श्रीपादपद्मप्रसादादक्षयं चारित्रं ददातु वः।

**(नेमिनाथ भगवान की जय।)**

ॐ श्रीमत्पार्श्वभट्टारकस्वामिनः श्रीपादपद्मप्रसादात्सर्वविघ्नविनाशनमस्तु वः।

**(पार्श्वनाथ भगवान की जय।)**

ॐ श्री वर्द्धमानस्वामिनः श्रीपादपद्मप्रसादात्सम्यग्दर्शनाद्यष्टगुणविशिष्टं चास्तु वः।

**(महावीर भगवान की जय।)**

ॐ ह्रीं लोकोद्योतनकरा अतीतकालसञ्जाता निर्वाण-सागर-महासाधु-विमलप्रभ-श्रीधर-सुदत्त-अमलप्रभ-उद्धर-अङ्गिर-सन्मति-सिन्धु-कुसुमाञ्जलि-शिवगण-उत्साह-ज्ञानेश्वर-परमेश्वर-विमलेश्वर-यशोधर-कृष्णमति-ज्ञानमति-शुद्धमति-श्रीभद्र-अतिक्रान्त-शान्ताश्चेति चतुर्विंशति भूतकालीन परमदेवपूजनप्रसादात्सर्वशान्तिर्भवतु।

ॐ ह्रीं भविष्यत्कालाभ्युदयप्रभवाः महापद्मदेव-सुरदेव-सुपार्श्व-स्वयम्प्रभ-सर्वात्मभूत-देवपुत्र-कुलपुत्र-उदङ्क-प्रोष्ठिल-जयकीर्ति-मुनिसुव्रत-अर-निष्पाप-निष्कषाय-विपुल-निर्मल-चित्रगुप्त-समाधिगुप्त-स्वयम्भू-अनिवर्तक-जय-विमल-देवपाल-अनन्तवीर्याश्चेति भविष्यत्-कालीन परमदेवपूजनप्रसादात्सर्वशान्तिर्भवतु।

ॐ त्रिकालवर्ती परमधर्माभ्युदयाः सीमन्धर-युगमन्धर-बाहु-सुबाहु-सुजात-स्वयम्प्रभ-वृषभानन-अनन्तवीर्य-सुरप्रभ-विशालकीर्ति-वज्रधर-चन्द्रानन-भद्रबाहु-भुजङ्गम-ईश्वर-नेमप्रभ-वीरसेन-महाभद्र-देवयश-अजितवीर्याश्चेति पञ्चविदेहक्षेत्र-विद्यमानविंशतिपरमदेवपूजनभक्तिप्रसादात् सर्वशान्तिर्भवतु तुष्टिपुष्टिश्च भवतु।

**पूजिता भरताद्यैश्च, भूपेन्द्रैर्भूरिभूतिभिः।**
**चतुर्विधस्य सङ्घस्य, शान्तिं कुर्वन्तु शाश्वतीम्।।**

**विघ्नौघाः प्रलयं यान्ति, शाकिनी-भूत-पन्नगाः।**
**विषो निर्विषतां याति, स्तूयमाने जिनेश्वरे॥**
**दुर्भिक्षादि महादोषा-निवारणपरम्पराः।**
**कुर्वन्तु जगतः शान्तिं, जिनश्रुतमुनीश्वराः॥**
**यत्संस्मरणमात्रेण, विघ्ना नश्यन्ति मूलतः।**
**कुर्वन्तु जगतः शान्तिं, जिनश्रुतमुनीश्वराः॥**
**शिवं च लभते प्राणी, यत्प्रसादात्प्रसादतः।**
**कुर्वन्तु जगतः शान्तिं, जिनश्रुतमुनीश्वराः॥**

ॐ वृषभादयो महतिमहावीरवर्द्धमानपर्यन्ताश्चतुर्विंशतितीर्थङ्करा अर्हन्तो भगवन्तः सर्वज्ञाः सर्वदर्शिनः सकलवीर्याः वीतरागद्वेषमोहास्त्रिलोकनाथास्त्रि-लोकमहितास्त्रिलोकप्रद्योतनकराजातिजरामरणविप्रमुक्ता भव्यजनहृत्-कमलवनसम्बोधनकरा देवाधिदेवा अनेकगुणगणालंकृतदिव्यदेहधराः पञ्च-महाकल्याणाष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयविशेषसम्प्राप्ताः सुरासुरोरगेन्द्र-मुकुटतटघटितमणिगणकिरणरागरञ्जितचारुचरणारविन्दद्वन्द्वा नृपतिशत-सहस्रालंकृत-सार्वभौमराजाधिराज-परमेश्वर-सकलचक्रवर्ती-बलदेव-वासु-देव-मण्डलीक-महामण्डलीक-महामात्य-सेनानाथ-राजश्रेष्ठि- पुरोहिता-धीश-कराञ्जलिनमित-करतलकमलमुकुलालंकृतपादपद्मयुगलाः विद्याधर-राजकिरीटकोटिरुचिररोविग्वृष्ट-चञ्चच्चरणकमलाः कुलिशनाल-रजतमृणाल-मन्दारकर्णिकारातिकुलगिरिशिखरिशेखरगगनगमन-मन्दाकिनी -महाह्रदनद -नदीसहस्रदलकमलवासिन्यादि-सर्वाभरणभूषिताङ्गसकल-सुरसुन्दरी-वृन्दवन्दित-चारुचरणकमलयुगला देवाधिदेवाः सशिष्यप्रति-शिष्यानुवर्गाः प्रसीदन्तु वः।

ॐ परम निर्वाणमार्गप्राप्ताः परममाङ्गल्य **((परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** ---नामधेयस्य सद्धर्मकार्येष्वैहिकामूत्रके च सिद्धाः सिद्धिं प्रयच्छन्तु वः।

**(प्रत्येक वाक्य के बाद प्रीयन्तां-प्रीयन्तां बोलते हुए जलधारा छोड़नी चाहिए।)**

ॐ आमौषधयः क्ष्वेलौषधयः जल्लौषधय विडौषधयः सर्वौषधश्च वः।

ॐ मतिःस्मृतिसंज्ञाचिन्ताभिनिबोधज्ञानिनश्च वः।

ॐ कोष्ठबुद्धिबीजबुद्धिपादानुसारीबुद्धिसम्भिन्नश्रोतृश्रवणाश्च वः।

ॐ जलचारणजङ्घाचारणतन्तुचारणभूमिचारणपुष्पचारणश्रेणिचारणपत्रचारण-फलचारणचतुरङ्गुलचारणाकाशचारणाश्च वः।

ॐ मनोबलिवचोबलिकायबलिनश्च वः।

ॐ सुधामधुक्षीरसर्पिराश्राव्यक्षीणमहानसाः वः।

ॐ सप्तर्द्धिगुणसंयुक्ताश्च वः।

ॐ उग्रतपो दिप्ततपो महातपो घोरतपोऽनुपमतपो महोग्रतपश्च वः।

ॐ मतिश्रुतावधिमनःपर्ययकेवलज्ञानिनश्च वः।

ॐ ह्रीं अर्हं णमो अरिहंताणं णमो जिणाणं ह्रां ह्रीं ह्रूं ह्रौं ह्रः अप्रतिचक्रे फट् विचक्राय झ्रौं झ्रौं स्वाहा। ऋद्धिमन्त्रभक्तिप्रसादात्सर्वेषां शान्तिर्भवतु, विशूचिका-ज्वरादिरोगविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो ओहिजिणाणं परमोहिजिणाणं शिरोरोगविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो सव्वोहिजिणाणं अक्षीरोगविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो अणंतोहिजिणाणं कर्णरोगविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो कोट्ठबुद्धीणं बीजबुद्धीणं ममात्मनि विवेकज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो पादाणुसारीणं परस्परविरोधविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो संभिण्णसोदाराणं श्वासरोगविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो सयंबुद्धाणं कवित्वं पाण्डित्वं च भवतु।

ॐ ह्रीं अर्हं णमो पत्तेयबुद्धाणं प्रतिवादिविद्याविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो बोहियबुद्धाणं पूर्णश्रुतज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो उजुमदीणं सर्वशान्तिर्भवतु।

ॐ ह्रीं अर्हं णमो विउलमदीणं बहुश्रुतज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो दसपुव्वीणं सर्ववेदिनो भवतु।

ॐ ह्रीं अर्हं णमो चोद्दसपुव्वीणं स्वसमय-परसमयवादिनो भवतु।

ॐ ह्रीं अर्हं णमो अट्ठंगमहाणिमित्तकुसलाणं जीवितमरणादिज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो विउव्वइड्ढिपत्ताणं कामितवस्तुप्राप्तिर्भवतु।

ॐ ह्रीं अर्हं णमो विज्जाहराणं उपदेशदेशमात्रज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो चारणाणं नष्टपदार्थचिन्ताज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो पण्णसमणाणं आयुषावसानज्ञानं भवतु।

ॐ ह्रीं अर्हं णमो आगासगामीणं अन्तरीक्षगमनं भवतु।

ॐ ह्रीं अर्हं णमो आसीविसाणं विद्वेषप्रतिहतं भवतु।

ॐ ह्रीं अर्हं णमो दिट्ठिविसाणं स्थावरजङ्गमकृतविषविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो उग्गतवाणं वचस्तम्भनं भवतु।

ॐ ह्रीं अर्हं णमो दित्ततवाणं सेनास्तम्भनं भवतु।

ॐ ह्रीं अर्हं णमो तत्ततवाणं अग्निस्तम्भनं भवतु।

ॐ ह्रीं अर्हं णमो महातवाणं जलस्तम्भनं भवतु।

ॐ ह्रीं अर्हं णमो घोरतवाणं विषरोगादिविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो घोरगुणाणं दुष्टमृगादिभयविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो घोरपरक्कमाणं लूताङ्गर्भातिकावलिविनाशो भवतु।

ॐ ह्रीं अर्हं णमो घोरगुणबंभयारीणं भूतप्रेतादिभयविनाशो भवतु।

ॐ ह्रीं अर्हं णमो आमोसहिपत्ताणं जन्मान्तरवैरभावविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो खेल्लोसहिपत्ताणं सर्वापमृत्युविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो जल्लोसहिपत्ताणं अपस्मारप्रलापनं-चिन्ताविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो विप्पोसहिपत्ताणं गजमारिविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो सव्वोसहिपत्ताणं मनुष्यामरोपसर्गविनाशनो भवतु।

ॐ ह्रीं अर्हं णमो मणबलीणं ॐ ह्रीं अर्हं णमो वचिबलीणं ॐ ह्रीं अर्हं णमो कायबलीणं अपस्मारि-गो-अजमारिविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो खीरसवीणं अष्टादशकुष्टगण्डमालादिकविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो सप्पिसवीणं समस्तशीतज्वरविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो महुरसवीणं सर्वव्याधिविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो अमियसवीणं समस्तोपसर्गविनाशनं भवतु।

ॐ ह्रीं अर्हं णमो अक्खीणमहाणसाणं अक्षीणर्द्धिर्भवतु।

ॐ ह्रीं अर्हं णमो वड्ढमाणाणं राजपुरुषादिभयविनाशं भवतु।

ॐ ह्रीं अर्हं णमो सव्वसिद्धायदणाणं सर्वकार्यसिद्धिर्भवतु।

ॐ ह्रीं अर्हं णमो भयवदो महदिमहावीरवड्ढमाणबुद्धरिसीणं समाधिसुखं भवतु।

चतुःषष्ठी ऋद्धिमन्त्रपूजनभक्तिप्रसादाच्चतुःसङ्घानां सर्वशान्तिर्भवतु तुष्टिपुष्टिश्च भवतु। धन-धान्यसमृद्धिर्भवतु, रत्नत्रयप्राप्तिर्भवतु।

ॐ यमवरुणकुबेरवासवाश्च वः।

ॐ असुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमारादि दशविध-भवनवासिकाश्च वः।

ॐ अनन्तवासुकीतक्षककर्कोटकमहापद्मशङ्खपालकुलिशजयविजयादि-महोरगाश्च वः।

ॐ इन्द्राग्नियमनैर्ऋत्यवरुणवायुकुबेरेशानधरणेन्द्रसोमदेवता इति दश-विधदिग्देवताश्च वः।

ॐ सुरासुरोरगेन्द्रचमरचारणसिद्धविद्याधरकिन्नरकिंपुरुषगरुडगन्धर्वयक्ष-राक्षसभूतपिशाचाश्च वः।

ॐ बुध-शुक्र-बृहस्पति-अर्क-इन्दु-शनैश्चाङ्गारक-राहु-केतु-तारकादि महाग्रहज्योतिष्कदेवताश्च वः।

ॐ चमर-वैरोचन-धरणेन्द्र-नन्द-भूतानन्द-वेणुदेव-वेणुधारि-पूर्ण-वशिष्ठ-जलकान्त-जलप्रभ-घोष-महाघोष-हरिषेण-हरिकान्त-अमितगति-अमितवाहन-वेलाञ्जन-प्रभञ्जन-अग्निशिखी-अग्निवाहनाश्चेति विंशति भवनेन्द्राश्च वः।

ॐ गीतरति-गीतकान्त-सत्पुरुष-महापुरुष-सुरूप-प्रतिरूप-घोष-प्रतिघोष-पूर्णभद्र-मणिभद्र-पुरुषचूल-महाचूल-भीम-महाभीम-काल-महाकालाश्चेति षोडशव्यन्तरेन्द्राश्च वः।

ॐ नाभिराज-जितशत्रु-दृढराज-स्वयंवर-मेघराज-धरणराज-सुप्रतिष्ठ-महासेन-सुग्रीव-दृढरथ-विष्णुराज-वसुपूज्य-कृतवर्म-सिंहसेन-भानुराज-विश्वसेन-सुरसेन-सुदर्शन-कुम्भराज-सुमित्र-जयवर्मा-समुद्रविजय-अश्वसेन-सिद्धार्थश्चेति जिनजनकाश्च वः।

ॐ मरुदेवी-जया-सुषेणा-सिद्धार्था-मङ्गला-सुसीमा-पृथ्वीमती-लक्ष्मीमती-रामा-सुनन्दा-वैष्णवी-विजया-सुशर्मा-लक्ष्मणा-सुदत्ता-ऐरादेवी-कमलावती-सुमित्रा-प्रभावती-पद्मावती-सुभद्रा-शिवादेवी-ब्रह्मला-प्रियकारिण्यभिधानाश्चेति चतुर्विंशतिजिनजनन्यो वः।

ॐ वृषभमुख-महायक्ष-त्रिमुख-यक्षेश्वर-तुम्बुर-कुसुमवर-नन्दी-विजय-अजित-ब्रह्मेश्वर-कुमार-षण्मुख-पाताल-किन्नर-किम्पुरुष-

गरुड-गन्धर्व-महेन्द्र-कुबेर-वरुण-विद्युत्प्रभ-सर्वाह्न-धरणेन्द्र-मातङ्गनामा-श्चेति चतुर्विंशति यक्षेन्द्राश्च वः।

ॐ चक्रेश्वरी-रोहिणी-प्रज्ञप्ति-वज्रश्रृङ्खला-पुरुषदत्ता-मनोवेगा-काली-ज्वालामालिनी-महाकाली-मानवी-गौरी-गान्धारी-वैरोटी-अनन्तमती-मानसी-महामानसी-जया-विजया-अपराजिता-बहुरूपिणी-चामुण्डी-कुष्माण्डी-पद्मावती-सिद्धायिन्यश्चेति चतुर्विंशतियक्षीदेवताश्च वः।

ॐ कुलगिरिशिखरशेखरीभूत-महाहृदादिसरोवरमध्यस्थित-सहस्रदल-कमलवासिन्यो मानिन्यः सकलसुरसुन्दरीवृन्दवन्दित-पादकमलाश्च वः।

ॐ यक्ष-वैश्वानर-राक्षस-नधृत-पन्नग-असुर-सुकुमार-पितृ-विश्वमालिनी-चमर-वैरोचन-महाविद्यमार-विश्वेश्वर-पिण्डाशनाश्चेति पञ्चदशतिथिदेवताश्च वः।

ॐ सौधर्म-ऐशान-सानत्कुमार-माहेन्द्र-ब्रह्म-ब्रह्मोत्तर-लान्तव-कापिष्ठ-शुक्र-महाशुक्र-शतार-सहस्रार-आनत-प्राणत-आरण-अच्युतादि षोडशकल्पवासिनश्च वः।

ॐ हिट्ठिमहिट्ठिम-हिट्ठिममज्झिम-हिट्ठिमोवरिम-मज्झिमहिट्ठिम-मज्झिम-मज्झिम-मज्झिमोवरिम-उपरिमहिट्ठिम-उवरिममज्झिम-उवरिमोवरिम नवग्रैवेयकवासिनोऽहमिन्द्रदेवाश्च वः।

ॐ अर्च्च-अर्च्चमालिनी-वज्र-वैरोचन-सोम-सोमरूपक-अङ्क-स्फटिक-आदित्यादि नवानुदिश-वासिनश्च वः।

ॐ विजय-वैजयन्त-जयन्त-अपराजित-सर्वार्थसिद्धिनामधेय-पञ्चानुत्तर-विमानवासिनश्च वः।

ॐ सारस्वत-आदित्य-वह्नि-अरुण-गर्दतोय-तुषित-अव्याबाध-अरिष्टा-श्चेत्यष्टौ लौकान्तिक-देवगणाश्च वः।

ॐ अग्न्याभ-सूर्याभ-चन्द्राभ-सत्याभ-श्रेयस्कर-क्षेमङ्कर-वृषभेष्ट-कामचर-निर्माणरज-दिगन्तरक्षित-आत्मरक्षित-सर्वरक्षित-मरुदेव-वसु-देव-अश्व-विश्वाश्चेति देवर्षयो वः।

ॐ अतीत-अनागत-वर्तमान-विकल्पानेकानेकविविधगुण-सम्पूर्णाष्ट-गुणसंयुक्त-सकलसिद्ध-समूहाश्च वः।

सर्वकालमपि **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** ---नामधेयरस्य

**(प्रत्येक शब्द के साथ तथास्तु बोलना चाहिए।)**

सम्पत्तिरस्तु, सिद्धिरस्तु, वृद्धिरस्तु, तुष्टिरस्तु, पुष्टिरस्तु, शान्तिरस्तु, कान्तिरस्तु, कल्याणमस्तु, सम्पदस्तु, मनःसमाधिरस्तु, श्रेयोभिवृद्धिरस्तु। शाम्यन्तु घोराणि, शाम्यन्तु पापानि।

**(प्रत्येक शब्द के साथ वर्धतां बोलना चाहिए।)**

पुण्यं वर्धतां, धर्मो वर्धतां, आयुर्वर्धतां, श्रीर्वर्धतां, कुलं गोत्रं चाभिवर्धतां।

स्वस्ति भद्रं चास्तु वः, स्वस्ति भद्रं चास्तु नः, ततो भूयो भूयः श्रेयो श्रेयः ॐ ह्रीं इवीं क्ष्वीं हं सः स्वस्त्यस्तु ते स्वस्त्यस्तु मे स्वाहा।

ॐ नमोऽर्हते भगवते श्रीमते श्रीमत्पार्श्वतीर्थङ्कराय श्रीमद् रत्नत्रयालंकृताय, दिव्यतेजोमूर्तये नमः, प्रभामण्डलमण्डिताय द्वादशगणपरिवेष्टिताय शुक्लध्यान -पवित्राय सर्वज्ञाय स्वयम्भुवे सिद्धाय बुद्धाय परमात्मने परमसुखाय त्रिलोक-महिताय अनन्तसंसारचक्रपरिमर्दनाय अनन्तज्ञानाय अनन्तदर्शनाय अनन्त-वीर्याय अनन्तसुखाय सिद्धाय बुद्धाय त्रिलोकवशङ्कराय सत्यज्ञानाय सत्य-ब्रह्मणे धरणेन्द्रफणामण्डलमण्डिताय उपसर्गविनाशनाय घातिकर्मक्षय-ङ्कराय अजराय अमराय अपवायं **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागर-परम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** ---नामधेयरस्य अस्माकं

**(प्रत्येक शब्द के बाद छिन्दि-छिन्दि, भिन्दि-भिन्दि बोलना चाहिए।)**

मृत्युम्। हन्तुकामम्। रतिकामम्। बलिकामम्। क्रोधम्। मानम्। मायाम्। लोभम्। पापम्। हिंसाम्। मृषाम्। चौर्यम्। अब्रह्मम्। परिग्रहम्। वैरम्। वायुधारणम्। अग्निम्। सर्वशत्रुम्। सर्वोपसर्गम्। सर्वविघ्नम्। सर्वभयम्। सर्वराजभयम्। सर्वचौरभयम्। सर्वदुष्टभयम्। सर्वमृगभयम्। सर्वमात्मचक्रभयम्। सर्वपरमन्त्रम्। सर्वशूलरोगम्। सर्वक्षयरोगम्। सर्वकुष्ठरोगम्। सर्वक्रूररोगम्। सर्वनरमारीम्। सर्वगजमारीम्। सर्वाश्वमारीम्। सर्वगोमारीम्। सर्वमहिषमारीम्। सर्वधान्यमारीम्। सर्ववृक्षमारीम्। सर्वगुल्ममारीम्। सर्वपत्रमारीम्। सर्वपुष्पमारीम्। सर्वफलमारीम्।

सर्वराष्ट्रमारीम्। सर्वदेशमारीम्। सर्वविषमारीम्। सर्ववेतालशाकिनीभयम्। सर्ववेदनीयम्। सर्वमोहनीयम्। सर्वकर्माष्टकम्।

**(प्रत्येक शब्द के बाद कुरु-कुरु बोलना चाहिए।)**

ॐ सुदर्शनमहाराजचक्रविक्रमतेजोबलशौर्यवीर्यशान्तिम्। सर्वजनानन्दनम्। सर्वभव्यानन्दनम्। सर्वगोकुलानन्दनम्। सर्वग्रामनगरखेटकर्वटमटम्बपत्तनद्रोणमुखसंवाहानन्दनम्। सर्वलोकानन्दनम्। सर्वदेशानन्दनम्। सर्वयजमानानन्दनम्।

सर्वदुःखं हन-हन, दह-दह, पच-पच, कुट-कुट, शीघ्रं-शीघ्रं सर्व वशमानय हूं फट् स्वाहा।

ॐ पुण्याहं पुण्याहं प्रियन्तां-प्रियन्ताम्।

भगवन्तोऽर्हन्तः सर्वज्ञाः सर्वदर्शिनः सकलवीर्याः सकलसुखास्त्रिलोकेशास्त्रिलोकेश्वरपूजितास्त्रिलोकनाथास्त्रिलोकमहितास्त्रिलोकप्रद्योतनकरा जातिजरामरणविप्रमुक्ताः सर्वविदश्च।

ॐ श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्म्यश्च वः प्रियन्तां-प्रियन्ताम्।

ॐ वृषभादिवर्द्धमानाः शान्तिकराः सर्वकर्मरिपुविजयकान्तार-दुर्गविषयेषु रक्षन्तु मे जिनेन्द्राः।

आदित्य-सोम-अङ्गारक-बुध-बृहस्पति-शुक्र-शनैश्चर-राहु-केतुनाम नवग्रहाश्च वः प्रियन्तां-प्रियन्ताम्।

तिथि-करण-नक्षत्र-वार-मुहूर्त-लग्नदेवाश्च इहान्यत्रग्रामनगराधिदेवताश्च ते सर्वे गुरुभक्ता अक्षीणकोश-कोष्ठागारा भवेयुः दानतपोवीर्यधर्मानुष्ठानादि नित्यमेवास्तु मातृ-पितृ-भ्रातृ-पुत्र-पौत्र-कलत्र-गुरु-सुहृत्स्वजन-सम्बन्धिबन्धुवर्गसहितस्यास्य यजमानस्य **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सानिध्ये)** --- नामधेयस्य

**(प्रत्येक शब्द के बाद तथास्तु बोलना चाहिए।)**

धनधान्यैश्वर्यद्युतिबलयशःकीर्तिबुद्धिवर्द्धनं भवतु। सामोदः प्रमोदो भवतु। शान्तिर्भवतु। कान्तिर्भवतु। तुष्टिर्भवतु। पुष्टिर्भवतु। सिद्धिर्भवतु। वृद्धिर्भवतु। अविघ्नमस्तु। आरोग्यमस्तु। आयुष्यमस्तु। शुभकर्मास्तु। कर्मसिद्धिरस्तु।

शास्त्रसमृद्धिरस्तु। इष्टसम्पदस्तु। अरिष्टनिरसनमस्तु। धनधान्यसमृद्धिरस्तु। काम माङ्गल्योत्सवः सन्तु, शाम्यन्तु घोराणि, शाम्यन्तु पापानि।

**(प्रत्येक शब्द के साथ वर्द्धतां बोलना चाहिए।)**

पुण्यं वर्द्धताम्। धर्मो वर्द्धताम्। श्री च वर्द्धताम्। आयुर्वर्द्धताम्। कुलगोत्रं चाभिवर्द्धताम्।

स्वस्ति भद्रं चास्तु वः, स्वस्ति भद्रं चास्तु नः, इवीं क्ष्वीं हं सः स्वस्त्यस्तु ते स्वस्त्यस्तु मे स्वाहा।

**यत्सुखं त्रिषु लोकेषु, व्याधिव्यसनवर्जितम्।**
**अभयं क्षेममारोग्यं, स्वस्तिरस्तु विधीयते।।**

**(प्रत्येक शब्द के साथ तथास्तु बोलना चाहिए।)**

श्री शान्तिरस्तु। शिवमस्तु। जयोऽस्तु। नित्यमारोग्यमस्तु। तव दृष्टिसुपुष्टिरस्तु। कल्याणमस्तु। सुखमस्तु। अभिवृद्धिरस्तु। दीर्घायुरस्तु। कुल-गोत्र-धन-धान्यं सदास्तु।

ॐ नमोऽर्हते भगवते श्रीमते प्रक्षीणाशेषदोषकल्मषाय दिव्यतेजोमूर्तये नमः श्री शान्तिनाथाय शान्तिकराय सर्वपापप्रणाशनाय सर्वविघ्नविनाशनाय सर्वरोगापमृत्युविनाशनाय सर्वपरकृत-क्षुद्रोपद्रवविनाशनाय सर्वक्षामरडामर-विनाशनाय ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा **(परम पूज्य चारित्र-चक्रवर्ती, आचार्यश्री आदिसागरपरम्परायां तत्पट्टशिष्य आचार्यश्री महावीरकीर्तेः पट्टशिष्य आचार्यश्री सन्मतिसागरस्य पट्टशिष्य आचार्यश्री सुविधिसागरस्य ससंघ सान्निध्ये)** ---नामधेयस्य सर्वशान्तिं कुरु-कुरु तुष्टिं कुरु-कुरु पुष्टिं कुरु-कुरु वषट् स्वाहा।

इत्यनेन मन्त्रेण नवग्रहशान्त्यर्थं गन्धोदकधारावर्षणम्।

पद्मप्रभ-चन्द्रप्रभ-वासुपूज्य-विमल-अनन्त-धर्म-शान्ति-कुन्थु-अर-नमि-वर्द्धमान-वृषभ-अजित-सम्भव-अभिनन्दन-सुमति-सुपार्श्व-शीतल-श्रेयांस-पुष्पदन्त-मुनिसुव्रत-मल्लि-नेमि-पार्श्वनाथ इत्येभ्यो नमो नमः।

पूर्वोक्त मन्त्राणां पूजनभक्तिप्रसादात् ऋष्यार्यिकाश्रावकश्राविकानां सर्वक्रोध-मान-माया-लोभ-हास्य-रति-अरति-शोक-भय-जुगुप्सा-स्त्रीवेद-पुरुषवेद-नपुंसकवेदविनाशनं भवतु, मिथ्यात्व-राग-द्वेष-मोह-मत्सर-असूया-ईर्ष्या-विभाव-विकार-विषाद-प्रमाद-कषाय-विकथाविनाशनं भवतु,

सर्वपञ्चेन्द्रियविषयेच्छा-स्नेह-आशा-रौद्राकुलता-व्याधि-दीनता-पाप-दोष-विरोधविनाशनं भवतु, सर्वममकार-विकल्प-निद्रा-तृष्णा-अधिताप-दुःख-वैर-अहङ्कार-सङ्कल्पविनाशो भवतु, सर्वाहार-भय-मैथुन-परिग्रह-संज्ञाविनाशो भवतु, सर्वसंख्यातकर्मविनाशनं भवतु, सर्वासंख्यातकर्मविनाशनं भवतु। सर्वमोहनीय-ज्ञानावरणीय-दर्शनावरणीय-अन्तराय-वेदनीय-नाम-गोत्र-आयुःकर्मविनाशनं भवतु।

**(छन्द = वसन्ततिलका)**

कल्याणमस्तु कमलाभिमुखी सदास्तु,
दीर्घायुरस्तु कुलगोत्रसमृद्धिरस्तु।
आरोग्यमस्त्वभिमतार्थफलाप्तिरस्तु,
भद्रं तवास्तु जिनपुङ्गवभक्तिरस्तु।।

**(छन्द = शार्दूलविक्रीडित)**

श्रीमज्जैनजिनार्चितप्रगटित-स्याद्वादरत्नाकरः,
सद्धर्मामृतचन्द्रसुश्रुतकरो-लावण्यरत्नाकरः।
मोक्षद्वारकपाटपाटनपटुः प्रध्यानरत्नाकरः,
भौमो भूरि गुणाकरो विजयते योगीन्द्ररत्नाकरः।।

**पवित्रतरगन्धोदकेन जिनमभिषेचयामि स्वाहा।**

## गन्धोदक लेने का मन्त्र

**(छन्द = शार्दूलविक्रीडित)**

मुक्तिश्रीवनिताकरोदकमिदं पुण्याङ्कुरोत्पादकं,
नागेन्द्रत्रिदशेन्द्रचक्रपदवी राज्याभिषेकोदकम्।
स्यात्सज्ज्ञानचरित्रदर्शनलता संसिद्धिसम्पादकं,
कीर्तिश्रीजयसाधकं तव जिन! स्नानस्य गन्धोदकम्।।

**(छन्द = शार्दूलविक्रीडित)**

नेत्रद्वन्द्वरुजो विनाशनकरं गात्रं पवित्रीकरं,
वातोपित्तकफादिदोषरहितं गात्रं च सत्रं भवेत्।
कामालाक्षयकुष्टरोगविषमग्राहक्षयङ्कारि तत्,
श्रीमत्पार्श्वजिनेन्द्रपादयुगल-स्नानस्य गन्धोदकम्।।

**(छन्द = शार्दूलविक्रीडित)**

घातिव्रातविघातजातविपुल-श्रीकेवलज्योतिषो-
देवस्यास्य पवित्रगात्रकलनात्पूतं हितं मङ्गलम्।
कुर्याद् भव्यभवार्तिदावशमनं स्वर्मोक्षलक्ष्मीफलं,
प्रोद्यद्धर्मलताभिवर्द्धनमिदं सद्गन्धगन्धोदकम्।।

**(छन्द = शार्दूलविक्रीडित)**

निःशेषाभ्युदयोपभोगफलवत्पुण्याङ्कुरोत्पादकं,
धृत्वा पङ्कनिवारकं भगवतः स्नानोदकं मस्तके।
ध्यातो विश्वमुनीश्वरैरभिनुतौ प्रेक्षावतामर्चितौ,
इन्द्राद्यैर्मुहूरर्चितौ जिनपतेः पादौ समभ्यर्चये।।

**(छन्द = उपजाति)**

सम्पूजकानां प्रतिपालकानां,
यतीन्द्रसामान्यतपोधनानाम्।
देशस्य राष्ट्रस्य पुरस्य राज्ञः,
करोतु शान्तिं भगवाँज्जिनेन्द्रः।।

**ॐ शान्तिः -मङ्गलं भूयात्।**

आत्मशान्ति को प्राप्त करने के लिए तथा विविध प्रकार के संकटों का विनाश करने के लिए जिनेन्द्र भगवान के मस्तक पर भक्तिपूर्वक जो धारा की जाती है, उसे शान्तिधारा कहते हैं।

वर्तमान में अनेक प्रकार की शान्तिधाराएँ उपलब्ध हो रही हैं। अधुनातन विद्वानों ने आधुनिक विघ्नों के नाम जोड़ कर भी इनका निर्माण किया है। इन सभी का उद्देश्य समान होने के कारण सभी उचित ही हैं।

शान्तिधारा करते समय दो नियमों का परिपालन अवश्य करना चाहिए। यथा-

**१.** शान्तिधारा करते समय नियम से मौन रखना चाहिए।

**२.** शान्तिधारा करते समय धारा को अखण्डित रखना चाहिए।

शान्तिधारा करते समय जितनी उपयोगशुद्धि होगी, शान्तिधारा का फल उतनी ही शीघ्रता से प्राप्त होगा।